Svasti Garbhavinayaka Ashtakam

स्वस्तिगर्भविनायकाष्टकम्

Document Information

Text title : Svasti Garbhavinayaka Ashtakam

File name : svastigarbhavinAyakAShTakam.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Author : Sanatana Gopala Sharma

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

sanskritdocuments.org

स्वस्तिगर्भविनायकाष्टकम्

(सन्तानगोपालशर्मकृतम्)
श्रीपतिप्रियभागिनेयमुमासुतं शिवनन्दनं
भक्तवत्सलमप्रमेयमनादिमन्तविवर्जितम् ।
सर्वलोकहितङ्करं नमतामभीष्टदमुत्तमं
स्वस्तिगर्भविनायकं प्रणमामि षण्मुखसोदरम् ॥ १॥

आखुवाहनमम्बिकासुतमप्रमेयगुणोज्ज्वलं
सर्वसिद्धिदमीशपुत्रमचिन्त्यपुण्यफलप्रदम् ।
नारदादिमुनीन्द्रषट्पदसेविताङ्घ्रिसरोरुहं
स्वस्तिगर्भविनायकं प्रणमामि शङ्करनन्दनम् ॥ २॥

दृप्तमुग्धशठादि दुस्त्यजविघ्नकारणवारणं
सच्चरित्रविचित्रदुस्त्यजविघ्नवारणवारणम् ।
वासवादि सुरासुरैरनिशं प्रपूजितविग्रहं
स्वस्तिगर्भविनायकं प्रणमामि लोकहितङ्करम् ॥ ३॥

सर्वरोगहरं हरात्मजमम्बुजासनपूजितं
भक्तवत्सलमग्रदिक्परिपालकं त्रिशिरःपुरे ।
नन्दिवन्दितमिन्दुभूषणमिन्दिरारमणप्रियं
स्वस्तिगर्भविनायकं प्रणमामि सर्वसुखप्रदम् ॥ ४॥

शास्तृ नन्दिसदाशिवेन्द्र नराननादिविनायकैः
वेदमातृ जगद्गुरूतम शङ्करादिभिरेव च ।
स्कन्दमारुतिदक्षिणास्य नवग्रहैरपि दुर्गया
सर्वतः परिवारितोऽयमतीव चारु विराजते ॥ ५॥

वेदपारगतैरभिष्टुतमन्वहं निजसन्निधौ
वेदमूर्तिममोघभाग्यदमादिमादि गजाननम् ।
वेदशास्त्र पुराणपण्डितमण्डितप्रिय सन्निधिं

वेद् कोन्विममुत्तमोत्तमदैवतं कलिनाशनम् ॥ ६॥

त्रैशिरः पुरमातृभूतशिवालयं परिपालयन्
पूर्वदिक्स्थित एष नूनमपूर्वसुन्दरविग्रहः ।
स्वस्तिगर्भविनायकोऽयमुपास्यतामनु सेव्यतां
प्राप्नुमायुररोगतामतुलं यशोऽखिल सम्पदः ॥ ७॥

लड्डुकै रुचिरैरतिप्रियमोदकैस्सरसैर्नवैः
इक्षुखण्ड कपित्थदाडिमनारिकेल फलैरपि ।
एकविंशति सङ्ख्या कृतवन्दनैरपि तोषितः
स्वस्तिगर्भविनायको विदधाति नः शुभमङ्गलम् ॥ ८॥

इति सन्तानगोपालशर्मकृतं स्वस्तिगर्भविनायकाष्टकं सम्पूर्णम् ।

Proofread by Narendran Madathil

Svasti Garbhavinayaka Ashtakam

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*